श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीगोपालविंशतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीगोपालविंशतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

वन्दे बृन्दावनचरं वल्लवीजनवल्लभम्।
जयन्तीसंभवं धाम वैजयन्तीविभूषणम्॥ १ ॥

वाचं निजाङ्करसिकां प्रसमीक्षमाणो
वक्त्रारविन्दविनिवेशितपाञ्चजन्यः।
वर्णत्रिकोणरुचिरे वरपुण्डरीके
बद्धासनो जयति वल्लवचक्रवर्ती॥ २ ॥

आम्नायगन्धिरुदितस्फुरिताधरोष्ठम्
आस्राविलेक्षणमनुक्षणमन्दहासम्।
गोपालडिम्भवपुषं कुहनाजनन्याः
प्राणस्तनन्धयमवैमि परं पुमांसम्॥ ३ ॥

आविर्भवत्वनिभृताभरणं पुरस्तात्
आकुञ्चितैकचरणं निभृतान्यपादम्।
दध्ना निमन्थमुखरेण निबद्धतालं
नाथस्य नन्दभवने नवनीतनाट्यम्॥ ४ ॥

हर्तुं कुम्भे विनिहितकरः स्वादु हैयङ्गवीनं
दृष्ट्वा दामग्रहणचटुलां मातरं जातरोषाम्।
पायादीषत् प्रचलितपदो नापगच्छन् न तिष्ठन्
मिथ्यागोपः सपदि नयने मीलयन् विश्वगोप्ता॥ ५ ॥

व्रजयोषिदपाङ्गवेधनीयं
मधुराभाग्यमनन्यभोग्यमीडे।

www.prapatti.com

वसुदेववधूस्तनन्धयं तत्
  किमपि ब्रह्म किशोरभावदृश्यम्॥ ६॥

परिवर्तितकन्धरं भयेन
  स्मितफुल्लाधरपल्लवं स्मरामि।
विटपित्वनिरासकं कयोश्चित्
  विपुलोलूखलकर्षकं कुमारम्॥ ७॥

निकटेषु निशामयामि नित्यं
  निगमान्तैरधुनाऽपि मृग्यमाणम्।
यमळार्जुनदृष्टबालकेळिं
  यमुनासाक्षिकयौवनं युवानम्॥ ८॥

पदवीमदवीयसीं विमुक्तेः
  अटवीसंपदमम्बुवाहयन्तीम्।
अरुणाधरसाभिलाषवंशां
  करुणां कारणमानुषीं भजामि॥ ९॥

अनिमेषनिषेवणीयमक्ष्णोः
  अजहद्यौवनमाविरस्तु चित्ते।
कलहायितकुन्तळं कलापैः
  करणोन्मादकविभ्रमं महो मे॥ १०॥

अनुयायिमनोज्ञवंशनाळैः
  अवतु स्पर्शितवल्लवीविमोहैः।
अनघस्मितशीतळैरसौ माम्
  अनुकम्पासरिदम्बुजैरपाङ्गैः॥ ११॥

अधराहितचारुवंशनाळाः
  मकुटालम्बिमयूरपिञ्छमालाः।
हरिनीलशिलाविभङ्गनीलाः
  प्रतिभाः सन्तु ममान्तिमप्रयाणे॥ १२॥

www.prapatti.com

अखिलानवलोकयामि कालान्
　　महिळाधीनभुजान्तरस्य यूनः।
अभिलाषपदं व्रजाङ्गनानाम्
　　अभिलापक्रमदूरमाभिरूप्यम्॥ १३ ॥

हृदि मुग्धशिखण्डमण्डनो
　　लिखितः केन ममैष शिल्पिना।
मदनातुरवल्लवाङ्गना-
　　वदनाम्भोजदिवाकरो युवा॥ १४ ॥

महसे महिताय मौळिना
　　विनतेनाञ्जलिमञ्जनत्विषे।
कलयामि विमुग्धवल्लवी-
　　वलयाभाषितमञ्जुवेणवे॥ १५ ॥

जयति ललितवृत्तिं शिक्षितो वल्लवीनां
　　शिथिलवलयशिञ्जाशीतळैर्हस्तताळैः।
अखिलभुवनरक्षागोपवेषस्य विष्णोः
　　अधरमणिसुधायामंशवान् वंशनालः॥ १६ ॥

चित्राकल्पः श्रवसि कलयन् लाङ्गलीकर्णपूरं
　　बर्होत्तंसस्फुरितचिकुरो बन्धुजीवं दधानः।
गुञ्जाबद्धामुरसि ललितां धारयन् हारयष्टिं
　　गोपस्त्रीणां जयति कितवः कोऽपि कौमारहारी॥ १७ ॥

लीलायष्टिं करकिसलये दक्षिणे न्यस्य धन्याम्
　　अंसे देव्याः पुळकरुचिरे सन्निविष्टान्यबाहुः।
मेघश्यामो जयति ललितो मेखलादत्तवेणुः
　　गुञ्जापीडस्फुरितचिकुरो गोपकन्याभुजङ्गः॥ १८ ॥

प्रत्यालीढस्थितिमधिगतां प्राप्तगाढाङ्कपाळिं
　　पश्चादीषन्मिलितनयनां प्रेयसीं प्रेक्षमाणः।

भस्त्रायन्त्रप्रणिहितकरो भक्तजीवातुरव्यात्
वारिक्रीडानिबिडवसनो वल्लवीवल्लभो नः॥ १९ ॥

वासो हृत्वा दिनकरसुतासन्निधौ वल्लवीनां
लीलास्मेरो जयति ललितामास्थितः कुन्दशाखाम्।
सव्रीडाभिस्तदनु वसने ताभिरभ्यर्थ्यमाने
कामी कश्चित् करकमलयोरञ्जलिं याचमानः॥ २० ॥

इत्यनन्यमनसा विनिर्मितां
वेङ्कटेशकविना स्तुतिं पठन्।
दिव्यवेणुरसिकं समीक्षते
दैवतं किमपि यौवतप्रियम्॥ २१ ॥

॥ इति श्रीगोपालविंशतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥